दिनाङ्क :- 10.01.2026 प्रात: - 06:55

## प्रधानमन्त्री-गुजरात

प्रधानमन्त्री नरेन्द्रमोदी अद्यारभ्य गुजरातराज्यस्य त्रिदिवसीय यात्रायां भविष्यति। प्रवासकाले प्रधानमन्त्री सोमनाथ-स्वाभिमान्-पर्वस्य अनेकेषु कार्यक्रमेषु भागं भजिष्यति। श्रीमोदी राजकोट, अहमदाबाद, गान्धीनगर इत्येतेषु स्थानेषु प्रमुखेषु विकास-कार्यक्रमेषु विभिन्न-सभायां च भागं ग्रहीष्यति। सोमनाथ-मन्दिरस्य चिरस्थायीभावम् आचर्यमाणः चतुर्दिवसीयः सोमनाथ-स्वाभिमान्-पर्वः गुरुवासरे गिर-सोमनाथ-मण्डलस्य तटीय-वेरावल-नगरे समारब्धः। कार्यक्रमोयं महमूद-गजनवी इत्यनेन कृत सोमनाथ-देवालयस्य उपरि प्रथमस्य आक्रमणस्य सहस्रवर्षाणां पूर्त्यवसरे आयोजिम् अस्ति। प्रधानमन्त्री अद्य सायङ्काले सोमनाथं गत्वा सोमनाथ-मन्दिरे ओंकारमन्त्रस्य जप-कार्यक्रमे भागं ग्रहीष्यति। सः मन्दिरे ड्रोन-प्रदर्शनम् अपि पश्यति। श्वः प्रधानमन्त्री सोमनाथमन्दिरस्य रक्षणार्थं स्वप्राणाहुतिं कृतानां असंख्य-योद्धृणां सम्माने आयोजिते औपचारिक-शौर्य-यात्रायां भागं ग्रहीष्यति। सः सोमनाथ-मन्दिरे पूजार्चनां कृत्वा सोमनाथ-स्वाभिमान-पर्वस्य अवसरे एकस्मिन् सार्वजनिक-कार्यक्रमेSपि भागं ग्रहीष्यति।

## विदेशमन्त्रालयः

विदेशमन्त्रालयः अवदत् यत्, रूस-देशात् तैल-क्रीणमाणानां देशानाम् उपरि उच्चशुल्कस्य प्रस्तावस्य यू. एस्. काङ्ग्रेस् इत्यस्य विधेयकस्य विकासस्य विषये नवदिल्ली निकटतया अवलोकनं कुर्वन् अस्ति। नवदिल्ली-नगरे वार्ताहरान् सम्बोधयन् मन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् ऊर्जा-स्रोतस्य बृहत्तरप्रश्ने भारतस्य स्थितिः सर्वविदिता अस्ति।

श्री जायसवालः अवदत् यत्, भारतम् अमेरिका-देशौ द्वयोः पूरकार्थव्यवस्थयोः मध्ये परस्परम् लाभप्रदं व्यापार-सन्धिं कर्तुं उत्सुकौ स्तः।

## आयव्यय-संकल्पना-सत्रम्

अस्य जनवरी-मासस्य अष्टाविंशति-दिनाङ्कादारभ्य, अप्रैल-मासस्य द्वितीय- दिनाङ्कपर्यन्तं, संसदः आयव्यय-संकल्पना-सत्रम् आरभते। सामाजिकान्तर्जालीये सन्देशे संसदीयकार्यमन्त्री किरेन रिजिजूः अवदत् यत्, आयव्यय-संकल्पना-सत्रस्य प्रथमस्य चरणस्य समापनं फरवरी-मासस्य त्रयोदश-दिनाङ्के भविष्यति। सः अवदत् यत्, मार्च्-मासस्य नवमे दिनाङ्के द्वितीयस्य चरणस्य आरम्भः भविष्यति।

## केन्द्रीय-शिक्षा

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्रतम वर्षपर्यन्तं भारतं विकसितभारते परिवर्तयितुं प्रधानमन्त्रिण: नरेन्द्रमोदिन: कल्पितं स्वप्नं तदा एव साकारं भवितुं शक्नोति यदा देशस्य प्रत्येकाय बालकाय गुणवत्तापूर्णशिक्षायाः प्राप्तिः भवेत्। सः ह्यः नवदिल्ली-नगरे समग्रशिक्षा शून्य दशमलव त्रीणि विषये हितधारकैः सह एकदिवसीयं परामर्शसम्मेलनं सम्बोधयन् समग्रशिक्षायाः पुनर्कल्पना वर्णितवान्।

## सूचना-प्रसारण-मन्त्री

केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अद्य अधोरेखितवान् यत् प्रसार-भारती इत्यस्य वेव्स्-मञ्चः व्यापकरूपेण वैश्विकप्रशंसाम् अवाप्नोत् तथा च पञ्च सहस्रकोटिरूप्यकाणां अन्ताराष्ट्रियव्यापारं समर्जितवान्। डी. डी. न्यूज वाहिन्यां क्रियेटर्स् कार्नर् इति नूतनस्य मञ्चस्य उद्घाटने श्री वैष्णवः इदम् उक्तवान्। सः अवदत् यत्, प्रसारभारत्याः नूतनस्य उपक्रमस्य उद्देश्यं सृजनात्मकविषयानां प्रदर्शनं प्रचार: चास्ति ।

## महिला-प्रीमियर

महिला-प्रीमियर-लीग-क्रिकेट- स्पर्धाया: चतुर्थ संस्करणस्य प्रथम-क्रीडायाम् रॉयल चैलेंजर्स बेंगलुरू-दलेन मुंबई-इंडियंस-दलं त्रिभि: स्तोभै: पराजिम्।